वित्तिवेद्यत्वनियमादेव गोव्यक्तौ नानाद्विषयत्वसिद्धेः प्रमाणविरहादेव गोत्वादिना गवयादिविषयत्वस्य तत्रासिद्धेश्च। यद्यपि जातेर्विषयत्वं तत्समवायिव्यक्तिविषयतानिरूपितमिति न व्याप्तिर्गोत्वाद्यालोचने काष्ठो गोत्ववानित्यादिबोधे च व्यभिचारात् नापि जातेर्निरवच्छिन्नप्रकारतायास्तथात्वनियमः गौरयमित्यादिज्ञानस्य प्रत्यक्षे गोत्वेनेमं जानामीत्याकारे तथात्वात् तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादिप्रकारत्वं गवादिविशेष्यतानिरूपितमेवेति व्याप्तिस्तादृशविशेष्यताकत्वं विना शुद्धस्य गोत्वादेरन्वयबोधेनास्पर्शनात् गुरूणां गोत्वेन गवयादिबोधस्यालीकत्वात्। अत एव गवाद्यंशे गोत्वादिप्रकारकोबोधः समवायेनेव सम्बन्धान्तरेणापि तत्प्रकारकः स्याद्गोत्वशक्तिज्ञानस्य तदीयसम्बन्धभावं प्रत्युदासीनत्वादित्यपि प्रत्युक्तं शाब्दमतेः शुद्धगोत्वप्रकारतायां गोविशेष्यताकत्वस्येव समवायावच्छिन्नत्वस्यापि व्याप्तिबलेन सिद्धावपि सम्बन्धान्तरावच्छिन्नत्वस्य प्रमाणविरहेणासिद्धेः। एवञ्च गोत्वादिशक्तिज्ञानत्वेन जनकतायां विषयतयावच्छेदकत्वाद्गोत्वादिरेव गवादिपदस्यार्थः गवादौ तद्व्यवहारस्तु तादृशावच्छेदकधर्मवत्त्वप्रयुक्तो गौणः। नचैवं गम्यादिधातोरपि गत्यादौ शक्तिर्न स्याद्गतित्वादिशक्तिज्ञानादेव तादृप्येण गत्यादेर्गम्यादिधातुतोबोधसम्भवादिति वाच्यं गुरूणां गतित्वादेः संस्थानाव्यङ्ग्यत्वेन जातित्वासम्भवात् उत्तरसंयोगाद्यवच्छिन्नक्रियात्वाद्युपाधिरूपे च तत्र स्वरूपतः शक्तिग्रहायोगात् सखण्डस्य निरवच्छिन्नप्रकारत्वाभावात् निरुक्तक्रियात्वतावच्छिन्नशक्तताज्ञानत्वेन हेतुतामपेक्ष्य लघुतया तादृशक्रियात्वावच्छिन्नशक्तिमत्त्वज्ञानत्वेनैव तथात्वौचित्यात् गुरुत्वादिप्रयोज्यस्य पतनत्वादेरखण्डत्वे पत्यादिधातूनामत्र शक्तत्वेऽपि क्षत्यभावाच्च। पश्वादिपदानामपि लोमवल्लाङ्गूलादिपर्य्यवसिते पशुत्वादिमात्रे न शक्तिस्तत्र वृत्तिग्रहोत्तरं तन्मात्रस्यैवानुभवेन तदाश्रयस्यालाभात् लोमादीनां स्वाश्रयतुल्यवित्तिवेद्यत्वस्य लोमवल्लाङ्गूलवान् देश इत्याद्यनुभवे व्यभिचारादितिप्राहुः।"

नैयायिकास्तु तदेतन्मतं पूर्वपक्षविधया व्यक्त्यादीनां केवलानां शब्दवाचतां निराकृत्य जातिविशिष्टस्यैव शक्यत्वं व्यवस्थापितं यथा गौ० सूत्रे तद्भाष्ये च।

"तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः।" सू०

"अविनाभाववृत्तिः सन्निधिः अविनाभावेन वर्त्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते तत्र न ज्ञायते किमन्यतमः पदार्थः उत सर्व इति। शब्दस्य प्रयोगसामर्थ्यात्पदार्थावधारणम् न स्यात्" भाष्यम्।

"याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः" सू०

"व्यक्तिः पदार्थः कस्मात् याशब्दप्रभृतीनां व्यक्तावुपचारादुपचारः प्रयोगः। या गौस्तिष्ठति या गौर्निषण्णेति नेदं वाक्यं जातेरभिधायकमभेदात् द्रव्याभिधायकम्, गवां समूह इत्यभेदात् द्रव्याभिधानं न जातेरभेदात्, वैद्याय गां ददातीति द्रव्यस्य त्यागो न जातेरमूर्त्तत्वात् प्रतिक्रमानुक्रमानुपपत्तेश्च। परिग्रहः स्वत्वेनाभिसम्बन्धः, कौण्डिन्यस्य गौ ब्राह्मणस्य गौरिति द्रव्याभिधाने द्रव्यभेदात् सम्बन्धभेद इति उपपन्नमभिन्ना तु जातिरिति, सङ्ख्या दश गावो विंशतिर्गाव इति भिन्नं द्रव्यं सङ्ख्यायते न जातिरभेदादिति, वृद्धिः कारणवतो द्रव्यस्यावयवोपचयः अवर्द्धत गौरिति निरवयवा तु जातिरिति, एतेनापचयो व्याख्यातः। वर्णः शुक्ला गौः कपिला गौरिति द्रव्यस्य शुक्लादियोगो न सामान्यस्य, समासः गोहितं गोसुखमिति द्रव्यस्य सुखादियोगो न जातेरिति। अनुबन्धः सरूपप्रजननसन्तानो गौ गां जनयतीति तदुत्पत्तिधर्मत्वाद्द्रव्ये युक्तं न जातौ विपर्य्ययादिति। द्रव्यं व्यक्तिरिति हि नार्थान्तरम्, अस्य प्रतिषेधः।" भा० "न तदनवस्थानात्" सू०

"न व्यक्तिः पदार्थः। कस्मादनवस्थानात् याशब्दप्रभृतिभिर्यो विशेष्यते स गोशब्दार्थो या गौस्तिष्ठति या गौर्निषण्णेति न द्रव्यमात्रमविशिष्टं जात्या विनाऽभिधीयते, किन्तर्हि जातिविशिष्टं, तस्मान्न व्यक्तिः पदार्थः एवं समूहादिषु द्रष्टव्यम्। यदि न व्यक्तिः पदार्थः कथं तर्हि व्यक्तावुपचार इति। निमित्तादतद्भावेऽपि तदुपचारो दृश्यते खलु" भा०।

"सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः" सू०

"अतद्भावेऽपि तदुपचार इत्यतच्छब्दस्य तेन शब्देनाभिधानमिति, सहचरणात् यष्टिकां भोजयेति यष्टिकासहचरितो ब्राह्मणोऽभिधीयेत इति, स्थानात् मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषा अभिधीयन्ते, तादर्थ्यात् कटार्थेषु वीरणेषु व्यूह्यमानेषु कटङ्करोतीति, वृत्तात् यमो राजा कुबेरो राजेति तद्वद्वर्त्तत इति, मानात् आढकेन मिताः सक्तवः आढकसक्तव इति धारणात् तुलया धृतं चन्दनं